# Shri Chidambara Panchachamara Stotram

# શ્રીચિદમ્બરપઞ્ચચામરસ્તોત્રમ્

## Document Information

Text title : Chidambara Panchachamara Stotram

File name : chidambarapanchachAmarastotram.itx

Category : shiva

Location : doc_shiva

Transliterated by : Sivakumar Thyagarajan shivakumar24 at gmail.com

Proofread by : Sivakumar Thyagarajan, PSA Easwaran, Aruna Narayanan

Description/comments : From stotrArNavaH 02-37

Latest update : March 25, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 24, 2021

*sanskritdocuments.org*

# શ્રીચિદમ્બરપઞ્ચચામરસ્તોત્રમ્

કદમ્બકાનનપ્રિયં ચિદમ્બયા વિહારિણં
    મદેભકુમ્ભગુમ્ફિતસ્વડિમ્ભલાલનોત્સુકમ્ ।
સદમ્ભકામખણ્ડનં સદમ્બુવાહિનીધરં
    હૃદમ્બુજે જગદ્ગુરું ચિદમ્બરં વિભાવયે ॥ ૧॥

સમસ્તભક્તપોષણસ્વહસ્તબદ્ધકઙ્કણં
    પ્રશસ્તકીર્તિવૈભવં નિરસ્તસજ્જનાપદમ્ ।
કરસ્થમુક્તિસાધનં શિરઃસ્થચન્દ્રમણ્ડનં
    હૃદમ્બુજે જગદ્ગુરું ચિદમ્બરં વિભાવયે ॥ ૨॥

જટાકિરીટમણ્ડિતં નિટાલલોચનાન્વિતં
    પટીકૃતાષ્ટદિક્તટં પટીરપઙ્કલેપનમ્ ।
નટૌઘપૂર્વભાવિનં કુઠારપાશધારિણં
    હૃદમ્બુજે જગદ્ગુરું ચિદમ્બરં વિભાવયે ॥ ૩॥

કુરઙ્ગશાવશોભિતં ચિરં ગજાનનાર્ચિતં
    પુરાઙ્ગનાવિચારદં વરાઙ્ગરાગરઞ્જિતમ્ ।
ખરાઙ્ગજાતનાશકં તુરઙ્ગમીકૃતાગમં
    હૃદમ્બુજે જગદ્ગુરૂં ચિદમ્બરં વિભાવયે ॥ ૪॥

અમન્દભાગ્યભાજનં સુમન્દહાસસન્મુખં
    સુમન્દમન્દગામિનીગિરીન્દ્રકન્યકાધવમ્ ।
શમં દમં દયાલુતામમન્દયન્તમાત્મનો
    હૃદમ્બુજે જગદ્ગુરું ચિદમ્બરં વિભાવયે ॥ ૫॥

કરીન્દ્રચર્મવાસસં ગિરીન્દ્રચાપધારિણં
    સુરેન્દ્રમુખ્યપૂજિતં ખગેન્દ્રવાહનપ્રિયમ્ ।
અહીન્દ્રભૂષણોજ્જ્વલં નગેન્દ્રજાવિલાસિનં
    હૃદમ્બુજે જગદ્ગુરું ચિદમ્બરં વિભાવયે ॥ ૬॥

મલાપહારિણીતટે સદા વિલાસકારિણં
    બલારિશાપભઞ્જનં લલામરૂપલોચનમ્ ।
લસત્ફણીન્દ્રહારિણં  જ્વલત્ત્રિશૂલધારિણં
    હૃદમ્બુજે જગદ્ગુરું ચિદમ્બરં વિભાવયે ॥ ૭॥

શશાङ्कભાનુવીતિહોત્રરાજિતત્રિલોચનં
    વિશાલવક્ષસં સુદીર્ઘબાહુદણ્ડમણ્ડિતમ્ ।
દિગમ્બરોલ્લસદ્વપુર્ધરં ધરારથાન્વિતં
    હૃદમ્બુજે જગદ્ગુરું ચિદમ્બરં વિભાવયે ॥ ૮॥

સદન્તરઙ્ગસજ્જનૌઘપાપસઙ્ઘનાશને
    મદાન્ધયુક્તદુર્જનાલિશિક્ષણે વિચક્ષણઃ ।
ચિદમ્બરાખ્યસદ્ગુરુસ્વરૂપમેત્ય ભૂતલે
    સદાશિવો વિરાજતે સદા મુદાન્વિતો હરઃ ॥ ૯॥

ચિદમ્બરાખ્યસદ્ગુરોરિદં સદા વિલાસિનં
    મુદા લિખન્તિ યે સકૃત્ સદોપમાનમષ્ટકમ્ ।
સદા વશે[સે]ત્તદાલયે હરિપ્રિયા તદાનને
    વિધિપ્રિયા ચ નિશ્ચલા જગદ્ગુરોરનુગ્રહાત્ ॥ ૧૦॥

॥ ઇતિ શ્રીચિદમ્બરપઞ્ચચામરસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded by Sivakumar Thyagarajan
Proofread by Sivakumar Thyagarajan, PSA Easwaran

*Shri Chidambara Panchachamara Stotram*
pdf was typeset on July 24, 2021

Please send corrections to *sanskrit@cheerful.com*